v.v.I

Qn: difference between उपादानलक्षणा and लक्षणलक्षणा.

→ विश्वनाथ कविराजपादैः साहित्यदर्पणस्य द्वितीयपरिच्छेदे लक्षणालक्षणम् तथा तद्भेदादिकम् च विशदं निरूपितम् अस्ति। उपादानलक्षणा लक्षणलक्षणा च इति लक्षणायाः विश्व- प्रधानतया भेदद्वयं विद्यते। तत्र उपादानलक्षणा विश्वनाथकविराजेन एवम् निरूपिता अस्ति — मुख्यार्थस्येतराक्षेप

अर्थात् वाक्यार्थस्य अन्वयसिद्ध्यै यया लक्षणया मुख्यार्थ भिन्नार्थस्य आक्षेपो भवति तथा च तत्र मुख्यार्थस्य अपि ग्रहणं जायते सा लक्षणा उपादानलक्षणा इत्युच्यते। उपादानेन मुख्यार्थ संयोगेन या लक्षणा सा एव उपादानलक्षणा। मुख्यार्थाविशिष्ट-तद् इतरार्थ- प्रतिपादकशक्तित्वम् उपादानलक्षणात्वम् इति लक्षणम् अत्र फलितम् इति। लक्षणानियमेन अत्रापि रूढिमूला उपादानलक्षणा - प्रयोजनमूला उपादान लक्षणा च इति भागद्वयम् वर्तते। रूढिमूलाया उपादानलक्षणाया उदाहरणं यथा — 'श्वेतो धावति' इति। 'श्वेत' पदस्य अचेतनत्वात् धावनक्रिया विशेषकेन 'धावति' इति पदेन सह अन्वयबाधः। तथा च श्वेत सम्बन्धिन अश्व पदस्य लक्षणया आक्षेपो भवति। प्रयोजनाभावात् अत्र रूढिरेव हेतुरूपा। तथा च प्रयोजनमूलाया उपादानलक्षणाया उदाहरणं यथा — 'कुन्ताः प्रविशन्ति'

इति । अस्मिन् वाक्ये 'कुन्ताः' पदस्य अचेतनत्वात् प्रवेश-क्रियाविशेषकेन 'प्रविशन्ति' इति पदेन अन्वयाभावात् मुख्यार्थबाधः, ततः कुन्तसम्बन्धिन पुरुष पदस्य लक्षणया आक्षेपस्य। अत्र कुन्तादीनां अतिग्रहणार्थं प्रयोजनम्।

लक्षणलक्षणायाः विषये विश्वनाथ-कविराजपादैः उक्तम् अस्ति —

अर्पणं स्वस्य ..

वाक्यार्थे वाक्यगतपदानां अन्वयसिद्धये यया लक्षणया मुख्यार्थस्य अर्पणं भवति परित्यागो जायते । सा खलु लक्षणलक्षणा इत्युच्यते। लक्षणानियमेन शापि अपि रूढिमूला प्रयोजनमूला च इति द्विप्रकारका भवति। रूढिमूलकाया लक्षणलक्षणाया उदाहरणं यथा — 'कलिङ्गः साहसिकः' इति। अस्मिन् उदाहरणे 'कलिङ्ग' इति देशवाचकपदेन सह 'साहसिक' इति गुणवाचकपदस्य अन्वयहीनत्वात् कलिङ्गनिवासी पुरुषः इत्यर्थः गृह्यते। अत्र तु मुख्यार्थस्य सम्पूर्णरूपेन अर्पणं भवति लक्ष्यार्थ-साधनप्रक्रियायाम्। देशपदेन देशवासी रूपार्थ-

ग्रहणे तु व्यवहारः लोके दृश्यते। अत एव एषा रूढिमूला लक्षणालक्षणा भवति। प्रयोजनमूलायाः लक्षणलक्षणायाः उदाहरणं यथा – 'गङ्गायां घोषः' इति। 'गङ्गा' शब्दस्य जलरूपार्थत्वात् तत्र घोषानाम् अवस्थितिः असम्भवा, अतः मुख्यार्थबाधः। ततः लक्षणया अत्र तटरूपार्थं गृह्यते। अत्र शीतत्वपावनत्वातिशयं प्रयोजनं भवति। अतः एषा प्रयोजनमूला लक्षणलक्षणा भवति।

उपादानलक्षणालक्षणलक्षणयोर्मध्ये अतिशयः भेदो दृश्यते। उपादानलक्षणायां तु मुख्यार्थस्य उपादानं विद्यते। अस्यां प्रक्रियायां मुख्यार्थः न हि सर्वथा स्वार्थं त्यजति। अतः एषा अजहत्स्वार्था इति उच्यते। परन्तु लक्षणलक्षणायां मुख्यार्थस्य सर्वथा अवलोकितर्भवति। तत्र लक्ष्यार्थे मुख्यार्थस्य सर्वथा अर्पणं एव बीजम्। अस्याम् लक्षणायाम् मुख्यार्थं स्वार्थं परित्यजति। अतः एषा लक्षणा जहत्स्वार्था इति नाम्ना अपि कथ्यते दर्शनादिशास्त्रे इति।